॥ श्रीरुद्रनाम त्रिशती ॥

नमो हिरण्यबाहवे नमः । सेनान्ये नमः । दिशां च पतये
नमः । नमो वृक्षेभ्यो नमः । हरिकेशेभ्यो नमः । पशूनां
पतये नमः । नमस्सस्पिंजराय नमः । त्विषीमते नमः ।
पथीनां पतये नमः । नमो बभ्लुशाय नमः । विव्याधिने
नमः । अन्नानां पतये नमः । नमो हरिकेशाय नमः । उप-
वीतिने नमः । पुष्टानां पतये नमः । नमो भवस्य हेत्यै नमः ।

@ankurnagpal108

जगतां पतये नमः । नमो रुद्राय नमः । आततविने नमः ।
क्षेत्राणां पतये नमः । नमस्सूताय नमः । अहन्त्याय नमः ।
वनानां पतये नमः । नमो रोहिताय नमः । स्थपतये नमः ।
वृक्षाणां पतये नमः । नमो मन्त्रिणे नमः । वाणिजाय नमः ।
कक्षाणां पतये नमः । नमो भुवन्तये नमः । वारिवस्कृताय
नमः । ओषधीनां पतये नमः । नम उच्चैर्घोषाय नमः । आक्र-
न्दयते नमः । पत्तीनां पतये नमः । नमः कृत्स्नवीताय नमः ।

धावते नमः । सत्वनां पतये नमः ॥ ३८ ॥

नमः सहमानाय नमः । निव्याधिने नमः । आव्या-
धिनीनां पतये नमः । नमः ककुभाय नमः । निषंगिणे नमः ।
स्तेनानां पतये नमः । नमो निषंगिणे नमः । इषुधिमते नमः ।
तस्कराणां पतये नमः । नमो वंचते नमः । परिवंचते नमः ।
स्तायूनां पतये नमः । नमो निचेरवे नमः । परिचराय नमः ।

@ankurnagpal108

अरण्यानां पतये नमः । नमः सृकाविभ्यो नमः । जिघांस-
द्भ्यो नमः । मुष्णतां पतये नमः । नमोऽसिमद्भ्यो नमः ।
नक्तं चरद्भ्यो नमः । प्रकृन्तानां पतये नमः । नमः उष्णीषिणे
नमः । गिरिचराय नमः । कुलुंचानां पतये नमः । नमः इषुमद्भ्यो
नमः । धन्वाविभ्यश्च नमः । वो नमः । नम आतन्वानेभ्यो
नमः । प्रतिदधानेभ्यश्च नमः । वो नमः । नम आयच्छद्भ्यो
नमः । विसृजद्भ्यश्च नमः । वो नमः । नमोऽस्यद्भ्यो नमः ।

विध्यद्भ्यश्च नमः । वो नमः । नम आसीनेभ्यो नमः । शया-
नेभ्यश्च नमः । वो नमः । नमः स्वपद्भ्यो नमः । जाग्रद्भ्यश्च
नमः । वो नमः । नमस्तिष्ठद्भ्यो नमः । धावद्भ्यश्च नमः ।
वो नमः । नमस्सभाभ्यो नमः । सभापतिभ्यश्च नमः । वो
नमः । नमो अश्वेभ्यो नमः । अश्वपतिभ्यश्च नमः । वो
नमः ॥ ८९ ॥

नम आव्याधिनीभ्यो नमः । विविध्यन्तीभ्यश्च नमः ।
वो नमः । नम उगणाभ्यो नमः । तृंहतीभ्यश्च नमः ।

@ankurnagpal108

वो नमः । नमो गृत्सेभ्यो नमः । गृत्सपतिभ्यश्च नमः ।
वो नमः । नमो व्रातेभ्यो नमः । व्रातपतिभ्यश्च नमः ॥१०० ॥
वो नमः । नमो गणेभ्यो नमः । गणपतिभ्यश्च नमः ।
वो नमः । नमो विरूपेभ्यो नमः । विश्वरूपेभ्यश्च नमः । वो
नमः । नमो महद्भ्यो नमः । क्षुल्लकेभ्यश्च नमः । वो नमः ।
नमो रथिभ्यो नमः । अरथेभ्यश्च नमः । वो नमः । नमो रथे-
भ्यो नमः । रथपतिभ्यश्च नमः । वो नमः । नमस्सेनाभ्यो नमः ।

सेनानिभ्यश्च नमः । वो नमः । नमः क्षत्तृभ्यो नमः । संग्रही-
तृभ्यश्च नमः । वो नमः । नमस्तक्षभ्यो नमः । रथकारेभ्यश्च
नमः । वो नमः । नमः कुलालेभ्यो नमः । कर्मारेभ्यश्च नमः ।
वो नमः । नमः पुंजिष्टेभ्यो नमः । निषादेभ्यश्च नमः । वो
नमः । नम इषुकृद्भ्यो नमः । धन्वकृद्भ्यश्च नमः । वो नमः ।
नमो मृगयुभ्यो नमः । श्वनिभ्यश्च नमः । वो नमः । नमः
श्वभ्यो नमः । श्वपतिभ्यश्च नमः । वो नमः ॥ १४० ॥

@ankurnagpal108

नमो भवाय च नमः । रुद्राय च नमः । नमश्शर्वाय च
नमः । पशुपतये च नमः । नमो नीलग्रीवाय च नमः । शिति-
कण्ठाय च नमः । नमः कपर्दिने च नमः । व्युप्तकेशाय च
नमः । नमस्सहस्राक्षाय च नमः । शतधन्वने च नमः ।
नमो गिरिशाय च नमः । शिपिविष्टाय च नमः । नमो मीढु-
ष्टमाय च नमः । इषुमते च नमः । नमो ह्रस्वाय च नमः ।
वामनाय च नमः । नमो बृहते च नमः । वर्षीयसे च नमः ।

नमो वृद्धाय च नमः । संवृध्वने च नमः । नमो अग्रियाय च
नमः । प्रथमाय च नमः । नम आशवे च नमः । अजिराय च
नमः । नमः शीघ्रियाय च नमः । शीभ्याय च नमः । नम
ऊर्म्याय च नमः । अवस्वन्याय च नमः । नमः स्रोतस्याय
च नमः । द्वीप्याय च नमः ॥ १७० ॥

नमो ज्येष्ठाय च नमः । कनिष्ठाय च नमः । नमः
पूर्वजाय च नमः । अपरजाय च नमः । नमो मध्यमाय च

नमः । अपगल्भाय च नमः । नमो जघन्याय च नमः ।
बुध्नियाय च नमः । नमः सोभ्याय च नमः । प्रतिसर्याय च
नमः । नमो याम्याय च नमः । क्षेम्याय च नमः । नम उर्व-
र्याय च नमः । खल्याय च नमः । नमः श्लोक्याय च नमः ।
अवसान्याय च नमः । नमो वन्याय च नमः । कक्ष्याय च
नमः । नम श्रवाय च नमः । प्रतिश्रवाय च नमः । नम
आशुषेणाय च नमः । आशुरथाय च नमः । नमः शूराय च

नमः । अवभिन्दते च नमः । नमो वर्मिणे च नमः । वरू-
थिने च नमः । नमो बिल्मिने च नमः । कवचिने च नमः ।
नमश्श्रुताय च नमः । श्रुतसेनाय च नमः ॥ २०० ॥

नमो दुन्दुभ्याय च नमः । आहनन्याय च नमः ।
नमो धृष्णवे च नमः । प्रमृशाय च नमः । नमो दूताय च
नमः । प्रहिताय च नमः । नमो निषंगिणे च नमः । इषुधि-
मते च नमः । नमस्तीक्ष्णेषवे च नमः । आयुधिने च नमः ।

नमः स्वायुधाय च नमः । सुधन्वने च नमः । नमः स्रुत्याय
च नमः । पथ्याय च नमः । नमः काट्याय च नमः ।
नीप्याय च नमः । नमस्सूद्याय च नमः । सरस्याय च नमः ।
नमो नाद्याय च नमः । वैशन्ताय च नमः । नमः कूप्याय च
नमः । अवट्याय च नमः । नमो वर्ष्याय च नमः । अवर्ष्याय
च नमः । नमो मेघ्याय च नमः । विद्युत्याय च नमः । नम
ईध्रियाय च नमः । आतप्याय च नमः । नमो वात्याय च

नमः । रेष्मियाय च नमः । नमो वास्तव्याय च नमः । वास्तु
पाय च नमः ॥ २३२ ॥

नमस्सोमाय च नमः । रुद्राय च नमः । नमस्ताम्राय
च नमः । अरुणाय च नमः । नमः शंगाय च नमः । पशु-
पतये च नमः । नम उग्राय च नमः । भीमाय च नमः । नमो
अग्रेवधाय च नमः । दूरेवधाय च नमः । नमो हन्त्रे च
नमः । हनीयसे च नमः । नमो वृक्षेभ्यो नमः । हरिकेशेभ्यो

 @ankurnagpal108

नमः । नमस्ताराय नमः । नमश्शंभवे च नमः । मयोभवे च
नमः । नमश्शंकराय च नमः । मयस्कराय च नमः । नमः
शिवाय च नमः । शिवतराय च नमः । नमस्तीर्थ्याय च
नमः । कूल्याय च नमः । नमः पार्याय च नमः । अवार्याय
च नमः । नमः प्रतरणाय च नमः । उत्तरणाय च नमः ।
नम आतार्याय च नमः । आलाद्याय च नमः । नमः शष्प्याय
च नमः । फेन्याय च नमः । नमस्सिकत्याय च नमः ।
प्रवाह्याय च नमः ॥ २६५ ॥

नम इरिण्याय च नमः । प्रपथ्याय च नमः । नमः
किꣳशिलाय च नमः । क्षयणाय च नमः । नमः कपर्दिने च
नमः । पुलस्तये च नमः । नमो गोष्ठ्याय च नमः । गृह-
याय च नमः । नमस्तल्प्याय च नमः । गेह्याय च नमः ।
नमः काट्याय च नमः । गह्वरेष्ठाय च नमः । नमो ह्रदय्याय
च नमः । निवेष्प्याय च नमः । नमः पाꣳसव्याय च नमः ।
रजस्याय च नमः । नमः शुष्क्याय च नमः । हरित्याय च

 @ankurnagpal108

नमः । नमो लोप्याय च नमः । उलप्याय च नमः । नम
ऊर्व्याय च नमः । सूर्म्याय च नमः । नमः पर्ण्याय च नमः ।
पर्णशद्याय च नमः । नमोपगुरमाणाय च नमः । अभिघ्नते
च नमः । नम आक्खिदते च नमः । प्रक्खिदते च नमः । नमो
वो नमः । किरिकेभ्यो नमः । देवानाꣳहृदयेभ्यो नमः । नमो
विक्षीणकेभ्यो नमः । नमो विचिन्वत्केभ्यो नमः । नम आनि-
र्हतेभ्यो नमः । नम आमीवत्केभ्यो नमः ॥ ३०० ॥

इति रुद्रनामत्रिशती १८. २० ॥